श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ चतुर्विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्विंशः सर्गः ॥

## रावणेनापहृतानां देवादिकन्यानां स्त्रीणां च विलापस्तं प्रति शापश्च रावणेन शूर्पणखाया आश्वासनं खरेण सह तस्या दण्डकारण्ये प्रेषणं च

निवर्तमानः संहृष्टो रावणः स दुरात्मवान्।
जह्रे पथि नरेन्द्रर्षिदेवदानवकन्यकाः॥ **7.24.1** ॥

दर्शनीयां हि यां रक्षः कन्यां स्त्री वाथ पश्यति।
हत्वा बन्धुजनं तस्या विमाने तां रुरोध सः॥ **7.24.2** ॥

एवं पन्नगकन्याश्च राक्षसासुरमानुषीः।
यक्षदानवकन्याश्च विमाने सोऽध्यरोपयत्॥ **7.24.3** ॥

ता हि सर्वाः समं दुःखान्मुमुचुर्बाष्पजं जलम्।
तुल्यमग्न्यर्चिषां तत्र शोकाग्निभयसम्भवम्॥ **7.24.4** ॥

ताभिः सर्वानवद्याभिर्नदीभिरिव सागरः।
आपूरितं विमानं तद् भयशोकाशिवाश्रुभिः॥ **7.24.5** ॥

नागगन्धर्वकन्याश्च महर्षितनयाश्च याः।
दैत्यदानवकन्याश्च विमाने शतशोऽरुदन्॥ **7.24.6** ॥

दीर्घकेश्यः सुचार्वङ्ग्यः पूर्णचन्द्रनिभाननाः।
पीनस्तनतटा मध्ये वज्रवेदिसमप्रभाः॥ **7.24.7** ॥

रथकूबरसङ्काशैः श्रोणिदेशैर्मनोहराः।
स्त्रियः सुराङ्गनाप्रख्या निष्टप्तकनकप्रभाः॥ **7.24.8**॥

शोकदुःखभयत्रस्ता विह्वलाश्च सुमध्यमाः।
तासां निःश्वासवातेन सर्वतः सम्प्रदीपितम्॥ **7.24.9**॥

अग्निहोत्रमिवाभाति सन्निरुद्धाग्नि पुष्पकम्।
दशग्रीववशं प्राप्तास्तास्तु शोकाकुलाः स्त्रियः॥ **7.24.10**॥

दीनवक्त्रेक्षणाः श्यामा मृग्यः सिंहवशा इव।
काचिच्चिन्तयती तत्र किं नु मां भक्षयिष्यति॥ **7.24.11**॥

काचिद् दध्यौ सुदुःखार्ता अपि मां मारयेदयम्।
इति मातृः पितृन् स्मृत्वा भर्तृन् भ्रातृंस्तथैव च॥ **7.24.12**॥

दुःखशोकसमाविष्टा विलेपुः सहिताः स्त्रियः।
कथं नु खलु मे पुत्रो भविष्यति मया विना॥ **7.24.13**॥

कथं माता कथं भ्राता निमग्नाः शोकसागरे।
हा कथं नु करिष्यामि भर्तुस्तस्मादहं विना॥ **7.24.14**॥

मृत्यो प्रसादयामि त्वां नय मां दुःखभागिनीम्।
किं नु तद् दुष्कृतं कर्म पुरा देहान्तरे कृतम्॥ **7.24.15**॥

एवं स्म दुःखिताः सर्वाः पतिताः शोकसागरे।
न खल्विदानीं पश्यामो दुःखस्यास्यान्तमात्मनः॥ **7.24.16**॥

अहो धिङ्मानुषं लोकं नास्ति खल्वधमः परः।
यद् दुर्बला बलवता भर्तारो रावणेन नः॥ **7.24.17**॥

सूर्येणोदयता काले नक्षत्राणीव नाशिताः।
अहो सुबलवद् रक्षो वधोपायेषु रज्यते॥ **7.24.18**॥

अहो दुर्वृत्तमास्थाय नात्मानं वै जुगुप्सते।
सर्वथा सदृशस्तावद् विक्रमोऽस्य दुरात्मनः॥ **7.24.19** ॥

इदं त्वसदृशं कर्म परदाराभिमर्शनम्।
यस्मादेष परक्यासु रमते राक्षसाधमः॥ **7.24.20** ॥

तस्माद् वै स्त्रीकृतेनैव वधं प्राप्स्यति दुर्मतिः।
सतीभिर्वरनारीभिरेवं वाक्येऽभ्युदीरिते॥ **7.24.21** ॥

नेदुर्दुन्दुभयः खस्थाः पुष्पवृष्टिः पपात च।
शप्तः स्त्रीभिः स तु समं हतौजा इव निष्प्रभः॥ **7.24.22** ॥

पतिव्रताभिः साध्वीभिर्बभूव विमना इव।
एवं विलपितं तासां शृण्वन् राक्षसपुङ्गवः॥ **7.24.23** ॥

प्रविवेश पुरी लङ्कां पूज्यमानो निशाचरैः।
एतस्मिन्नन्तरे घोरा राक्षसी कामरूपिणी॥ **7.24.24** ॥

सहसा पतिता भूमौ भगिनी रावणस्य सा।
तां स्वसारं समुत्थाप्य रावणः परिसान्त्वयन्॥ **7.24.25** ॥

अब्रवीत् किमिदं भद्रे वक्तुकामासि मां द्रुतम्।
सा बाष्पपरिरुद्धाक्षी रक्ताक्षी वाक्यमब्रवीत्॥ **7.24.26** ॥

कृतास्मि विधवा राजंस्त्वया बलवता बलात्।
एते राजंस्त्वया वीर्याद् दैत्या विनिहता रणे॥ **7.24.27** ॥

कालकेया इति ख्याताः सहस्राणि चतुर्दश।
प्राणेभ्योऽपि गरीयान् मे तत्र भर्ता महाबलः॥ **7.24.28** ॥

सोऽपि त्वया हतस्तात रिपुणा भ्रातृगन्धिना।
त्वयास्मि निहता राजन् स्वयमेव हि बन्धुना॥ **7.24.29** ॥

राजन् वैधव्यशब्दं च भोक्ष्यामि त्वत्कृतं ह्यहम्।
ननु नाम त्वया रक्ष्यो जामाता समरेष्वपि ॥ **7.24.30** ॥

स त्वया निहतो युद्धे स्वयमेव न लज्जसे।
एवमुक्तो दशग्रीवो भगिन्या क्रोशमानया ॥ **7.24.31** ॥

अब्रवीत् सान्त्वयित्वा तां सामपूर्वमिदं वचः।
अलं वत्से रुदित्वा ते न भेतव्यं च सर्वशः ॥ **7.24.32** ॥

दानमानप्रसादैस्त्वां तोषयिष्यामि यत्नतः।
युद्धप्रमत्तो व्याक्षिप्तो जयाकाङ्क्षी क्षिपञ्शरान् ॥ **7.24.33** ॥

नाहमज्ञासिषं युध्यन् स्वान् परान् वापि संयुगे।
जामातरं न जाने स्म प्रहरन् युद्धदुर्मदः ॥ **7.24.34** ॥

तेनासौ निहतः सङ्ख्ये मया भर्ता तव स्वसः।
अस्मिन् काले तु यत् प्राप्तं तत् करिष्यामि ते हितम् ॥ **7.24.35** ॥

भ्रातुरैश्वर्ययुक्तस्य खरस्य वस पार्श्वतः।
चतुर्दशानां भ्राता ते सहस्राणां भविष्यति ॥ **7.24.36** ॥

प्रभुः प्रयाणे दाने च राक्षसानां महाबलः।
तत्र मातृष्वसेयस्ते भ्रातायं वै खरः प्रभुः ॥ **7.24.37** ॥

भविष्यति तवादेशं सदा कुर्वन् निशाचरः।
शीघ्रं गच्छत्वयं वीरो दण्डकान् परिरक्षितुम् ॥ **7.24.38** ॥

दूषणोऽस्य बलाध्यक्षो भविष्यति महाबलः।
तत्र ते वचनं शूरः करिष्यति सदा खरः ॥ **7.24.39** ॥

रक्षसां कामरूपाणां प्रभुरेष भविष्यति।
एवमुक्त्वा दशग्रीवः सैन्यमस्यादिदेश ह ॥ **7.24.40** ॥

चतुर्दश सहस्राणि रक्षसां वीर्यशालिनाम्।
स तैः परिवृतः सर्वै राक्षसैर्घोरदर्शनैः॥ **7.24.41** ॥

आगच्छत खरः शीघ्रं दण्डकानकुतोभयः।
स तत्र कारयामास राज्यं निहतकण्टकम्।
सा च शूर्पणखा तत्र न्यवसद् दण्डके वने॥ **7.24.42** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुर्विंशः सर्गः॥